|| શિવસ્તુતિઃ ||

સ્ફુટં સ્ફટિકસપ્રભં સ્ફુટિતહાટકશ્રીજટં
શશાંકદલશેખરં કપિલફુલ્લનેત્રત્રયમ |
તરક્ષુવરકૃત્તિમદ્ભુજગભૂષણં ભૂતિમત
કદા નુ શિતિકંઠ તે વપુરવેક્ષતે વીક્ષણમ || ૧ ||
ત્રિલોચન વિલોચને લસતિ તે લલામાયિતે
સ્મરો નિયમઘસ્મરો નિયમિનામભૂદ્ભસ્મસાત |
સ્વભક્તિલતયા વશીકૃતવતી સતીયં સતિ
સ્વભક્તવશગો ભવાનપિ વશી પ્રસીદ પ્રભો || ૨ ||
મહેશ મહિતોઽસિ તત્પુરુષ પૂરુષાગ્ર્યો ભવાર્સ
નઘોર રિપુઘોર તેઽનવમ વામદેવાંચલિઃ |
નમઃ સપદિજાત તે ત્વમિતિ પંચરૂપોઽંચિતઃ
પ્રપંચય ચ પંચવૃન્મમ મનસ્તમસ્તાડય || ૩ ||
રસાઘનરસાનલાનિલવિયદ્વિવસ્વદ્વિધુ સ
પ્રયષ્ટૃષુ નિવિષ્ટમિત્યજ ભજાઆમિ મૂર્ત્યષ્ટકમ |
પ્રશાંતમુત ભીષણં ભુવનમોહનં ચેત્યહો
વપૂંષિ ગુણપુંષિ તેઽહમહમાત્મનોઽહંભિદે || ૪ ||
વિમુક્તિપરમાધ્વનાં તવ ષડધ્વનામાસ્પદં

પદં નિગમવેદિનો જગતિ વામદેવાદયઃ |
કથંચિદુપશિક્ષિતા ભગવતૈવ સંવિદ્રતે
વયં તુ વિરલાંતરાઃ કથમુમેશ તન્મન્મહે || ૫ ||
કઠોરતકુઠારયા લલિતશૂલયા બાહયા
રણડ્ઢમરયાઅ સ્કુરદ્ધરિણયા સખટ્વાંગયા |
ચલાભિરચલાભિરપ્યગણિતાભિરુત્રૃત્યત સ
શ્ચતુર્દશા જગંતિ તે જય જયેત્યયુર્વિસ્મયમ || ૬ ||
પુરત્રિપુરરંધનં વિવિધદૈત્યવિધ્વંસનં
પરાક્રમપરંપરા અપિ પરા ન તે વિસ્મયઃ |
અમર્ષબલહર્ષિતક્ષુભિતવૃત્તનેત્રત્રયો સ
જ્જ્વલજ્વલન હેલયા શલભિતં હિ લોકત્રયમ || ૭ ||
સહસ્રનયનો ગુહઃ સહસહસ્રરશ્મિર્વિધુ સ
ર્બૃહસ્પતિરુતાપ્પતિઃ સસુરસિદ્ધવિધ્યાધરાઃ |
ભવત્પદપરાયણાઃ શ્રીયમિમામગુઃ પ્રાર્થિનાં
ભવાન સુરતરુર્દૃશં દિશ શિવાં શિવાવલ્લભ || ૮ ||
તવ પ્રિયતમાદતિપ્રિયતમં સદૈવાંતરં
પયસ્યુપહિતં ઘૃતં સ્વયમિવ શ્રિયો વલ્લભમ |
વિભિધ્ય લઘુબુદ્ધયઃ સ્વપરપક્ષલક્ષાયિતં
પઠંતિ હિ લુઠંતિ તે શઠહ્યદઃ શુચા શુંઠિતાઃ || ૯ ||

નિવાસનિલયશ્ચિતા તવ શિરસ્તતિર્માલિકા
કપાલમપિ તે કરે ત્વમશિવોऽસ્યનંતર્ધિયામ |
તથાऽપિ ભવતઃ પદં શિવ શિવેત્યદો જલ્પતાસ
મકિંચન ન કિંચન વૃજિનમસ્ત્યભસ્મીભવત || ૧૦ ||
ત્વમેવ કિલ કામધક સકલકામમાપૂરયન
અપિ ત્રિનયનઃ સદા વહસિ ચાત્રિનેત્રોદ્ભવમ |
વિષં વિષધરાન દધત પિબસિ તેન ચાનંદવાન
વિરુદ્ધચરિતોચિતા જગદધીશ તે ભિક્ષુતા || ૧૧ ||
નમઃ શિવ શિવાશિવાશિવ શિવાર્ધ કૃંતાશિવં
નમો હર હર હરાહરહરાંતરીં મે દૃશમ |
નમો ભવ ભવાભવ પ્રભવ ભૂતયે સંપદાં
નમો મૃડ નમો નમો નમ ઉમેશ તુભ્યં નમઃ || ૧૨ ||
સતાં શ્રવણપદ્ધતિં સરતુ સન્નતોક્ત્રેત્યસૌ
શિવસ્ય કરુણંકુરાત પ્રતિકૃતાત સદા સોદિતા |
ઇતિ પ્રથિતમાનસો વ્યધિત નામ નારાયણઃ
શિવસ્તુતિમિમાં શિવાં લિકુચસૂરિસૂનુઃ સુધીઃ || ૧૩ ||
|| શ્રી (લિકુચ) નારાયણપંડિતાચાર્યવિરચિતા શિવસ્તુતિઃ ||
|| ભારતીરમણમુખ્યપ્રાણાંતર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ||